International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2023; 9(5): 185-187
© 2023 IJSR
www.anantaajournal.com
Received: 28-08-2023
Accepted: 30-09-2023

**Dr. S Arunasundaram**
MA, M.Phil., Ph.D., Principal I/C,
Madras Sanskrit College, Chennai,
Tamil Nadu, India

**Corresponding Author:**
**Dr. S Arunasundaram**
MA, M.Phil., Ph.D., Principal I/C,
Madras Sanskrit College, Chennai,
Tamil Nadu, India

# प्रभायां बन्धुः, राहुः, वह्निः इत्येषां पदानाम् उणादिशास्त्ररीत्या पर्यालोचनम् (शैवागमपद्धतिग्रन्थस्य क्रियाक्रमद्योतिकायाः व्याख्या प्रभा)

## S Arunasundaram

### प्रस्तावना

शब्दशास्त्रस्य व्याकरणस्य नियमैः प्रभाव्याख्या कियत्पर्यन्तं प्रभाविता? इति परिशीलनाय अस्मिन् शोधपत्रे उणाद्यन्तानि पदानि सङ्गृहीतानि । पाणिनीयस्य महाशास्त्रस्य, उणादिशास्त्र-निरुक्तयोः च मध्ये यद्यपि साक्षात् सम्बन्धः नास्ति, तथापि आचार्यपाणिनिः "उणादयो बहुलम्" (३-३-१) इति सूत्रप्रणयनमुखेन, उणादिशब्दनिर्देश-मुखेन च परम्परया उणादिशास्त्रस्य परिग्राह्यत्वं बोधयति ॥

सर्वेषामपि प्रातिपदिकानां व्युत्पत्तिः = प्रकृति-प्रत्यय-विवेचनं, वक्तव्या एव इति निरुक्तकाराणां, शाकटायनाचार्याणां च मतम् । सर्वाण्यपि प्रातिपदिकानि धातुमूलानि इति स्थापनीयम् इति तेषां सिद्धान्तः । यदि सर्वाण्यपि धातुमूलानि, तर्हि सर्वाण्यपि प्रातिपदिकानि कृदन्तानि सम्पद्येरन् । यदि सर्वाण्यपि कृदन्तानि तर्हि "कृत्तद्धितसमासाश्च" (१-२-४६) इति सूत्रेणैव सर्वेषां प्रातिपदिकसंज्ञा सिद्ध्येत्, "अर्थवदधातुरप्रत्ययः प्रातिपदिकम्" (१-२-४५) इति सूत्रसङ्कीर्तनं व्यर्थमेव ॥

परन्तु पाणिनिः "अर्थवत्: - सूत्रमेव प्रथमं निर्माति । तेन अव्युत्पत्तिपक्षः एव पाणिनिसम्मतः - इति ज्ञायते । पाणिनिः प्रातिपदिकानि अन्ततो गत्वा कृदन्तपर्यन्तं स्वीकुरुते। धातुं मूलप्रकृतिं कृत्वा, कृत्प्रत्ययान् विदधन् प्रातिपदिकं निष्पादयति पाणिनिः ॥

तत्रापि सर्वाण्यपि प्रातिपदिकानि कृदन्तत्वेन न परिष्कुरुते । तानि पाणिनिमते अव्युत्पन्नानि । परन्तु एवञ्जातीयकानामपि पदानां प्रकृतिप्रत्यय-बोधनाय निरुक्तादिकं कृतप्रयत्नं राजते । तदेव

> **"नाम च धातुजम् आह निरुक्ते व्याकरणे शकटस्य च तोकम् ।**
> **यन्न विशेषपदार्थसमुत्थं प्रत्ययतः प्रकृतेश्च तदूह्यम् ॥"[1] इति प्रसिद्धम् ॥**

अतः पाणिनीये यानि अव्युत्पन्नानि, तानि उणादिशास्त्रेण, उणाद्यन्तत्वकल्पनेन व्युत्पन्नानि सम्पद्यन्ते । उणादिशास्त्रं च दशपादि, पञ्चपादि इति द्वेधा उपलभ्यते । उणादिशास्त्रस्य पाणिनिः कर्ता ? उत अन्यः ? इति यद्यपि विप्रतिपत्तिः अस्ति, तथापि "उणादयो बहुलम्" (३-३-१) इति सूत्रेण, पक्षतः परिग्राह्यत्वं तस्य शास्त्रस्य सूचितम् । अत एव भट्टोजीदीक्षितैरपि "उणादिप्रकरणं", वैयाकरणसिद्धान्तकौमुद्यां निवेशितम् ॥

प्रभायाम् उणादिशास्त्रदृष्ट्या बहूनि विवेचनानि कृतानि दृश्यन्ते । तेषां पदानां पाणिनिसूत्रम् अवलम्ब्य व्युत्पत्तिसमर्थनं नैव घटते ॥

केषाञ्चितु पदानाम् "अविद्यमाने सामान्येऽपि अक्षरवर्णसामान्यात् निर्ब्रूयात्"[2] इति यास्कस्य निर्वचनरीतिमादृत्य, विवृतिः कृता ॥ कानिचन पदानि, कैश्चित् कृदन्तत्वेन, कैश्चित् तद्धितान्तत्वेन, कैश्चित् समासत्वेन, कैश्चित् उणाद्यन्तत्वेन, कैश्चित् निरुक्तत्वेन च व्याख्यातानि । अतः अस्मिन् शोधपत्रे निवेष्टव्याः इति येषां नियमः न दृश्यते, तज्जातीयकाः शब्दाः अत्र, "उणाद्यन्तानि" इति शीर्षके आलोच्यन्ते ॥

प्रथमं प्रभासम्मता व्युत्पत्तिः प्रस्तूयते । ततश्च वैयाकरणैः व्याख्यात्रादिभिः कल्पिताः प्रकृति-प्रत्यय-कल्पनाः उपस्थाप्यन्ते । ततः तोलनं, भेद-वैशिष्ट्य-परिज्ञानं, ततः प्रभायाः व्याकरणानुसारित्वपरिचिन्तनम्, अवसाने व्याख्यानस्य साम्य-वैषम्यनिरूपणं च यथासम्भवं परामर्शस्य प्रयोजनत्वेन कर्तव्यं इति परिपाटी ।

---

[1] व्या.म.भा.-II, सू.-3.3.1., पु.सं.-204.

[2] नि.नि., पु.सं.-44.

**"यथा पथः समाख्यानं वृक्ष-वल्मीकपर्वतैः ।**
**अविरुद्धं गवादीनां भिन्नैश्च सहचारिभिः ॥"**

इति हर्युक्तवत्, एतेषामन्वाख्यानानां तत्त्वज्ञापने एव तात्पर्यमिति निश्चेतुं प्रयत्नः आस्थीयते ॥

**बन्धु**

'बन्धु' पदस्य व्युत्पत्तिः इत्थं ज्ञापिता -

**प्रभा :-** (बन्धुजनानुयातम्) इति । अत्र 'बध्नाति', 'संबध्यते' इति वा बन्धुपदव्युत्पत्तिः ज्ञेया इति ।[3]

प्रकृते, बध्नाति, सम्बध्यते इति पदद्वयमवलम्ब्य बन्धु-शब्दः निष्पादितः । सा च निष्पत्तिः, पाणिनिसूत्रानुरोधेन अस्ति ? उत उणादिसूत्रानुरोधेनास्ति ? उत निर्वचनमात्रम् ? इति विमृशामः ॥

**विमर्शात्मकम् अध्ययनम्**

प्रभायां 'बध्नाति' इति निर्दिष्टत्वात् 'बन्ध बन्धने' (क्र्या.ग.-40 क्षी.त.) इति क्र्यादि-धातुः स्वीकृतः । स एव धातुः 'संबध्यते' इति कर्मणि निर्दिष्टः। पाणिनिना बन्धुपदनिष्पत्त्यर्थं यत्किमपि सूत्रं नादिष्टम् । परन्तु "शॄ-स्वृ-ष्णि-त्रपि-असि-वसि-हनि-क्लिति-बन्धि-मनिभ्यश्च" (१-१०) इति उणादिसूत्रेण 'उ' प्रत्ययः विहितः। स च नित्त्वेन अतिदिष्टः । तत्र सूत्रे 'बन्धि' इति निर्दिष्टम् । प्रभायामपि 'बध्नाति' इति निर्देशात्, उणादिसूत्रेण 'उ' प्रत्ययसिद्धये एव, तथा क्र्यादि-गणपठितः धातुरुपात्तः । न तु 'बन्ध संयमने' इति चौरादिकः, 'बध बन्धने' इति भौवादिको वा गृहीतः। एवञ्च अनेन सूत्रेण उ-प्रत्यय-प्राप्तये एव, प्रभायां 'बध्नाति' इति निर्दिष्टम्-इति प्रभायाः वैशिष्ट्यम् अधिगन्तुं पारयाम: ॥

**प्रकृत सूत्रेण बन्ध्-धातोः परत्र उ-प्रत्यये, बन्ध्+उ = 'बन्धु' इति इष्टम् सिद्ध्यति ॥**

वैदिकलौकिककोषे, 'प्रेम्णा बध्नाति इति बन्धुः, सज्जनोवा' [4] इति, श्वेतवनवासिविरचित-उणादिवृत्तौ, 'बध्नाति इति बन्धुः बान्धवः ।, बध्यतेऽस्मिन् इति वा बन्धुः, द्रव्यं सर्वम्' [5] इति, प्रक्रियासर्वस्वे, "सम्बध्नाति बन्धुः" [6] इति, शब्दकल्पद्रुमे, "स्नेहन मनः बध्नाति यः"[7] इति, वाचस्पत्ये 'बध्नाति मनः स्नेहादिना, बन्ध् + उ'[8] इति च व्युत्पत्तयः दरीदृश्यन्ते ॥

**एवञ्च सर्वैरपि वैयाकरणैर्व्याख्यातृभिः** बन्धु-पदव्युत्पादनाय क्रैयादिकः बन्धुधातुरेव गृहीतः, औणादिक - उ-प्रत्यय एव आदृतः इति स्पष्टं निर्धार्यते । प्रभाऽपि तमेव पन्थानम् अनुसरति इति स्फुटं व्याकरणमार्गानुयायित्वं प्रतीयते ॥

तत्र सरस्वतीकण्ठाभरणस्थ - उणादिसूत्रस्थ - आनुपूर्वी तावत् 'पटि-कटि-असि-वसु-त्रपि-हनि-मनि-शॄ-स्वृ-स्निहि-क्लिदि-कन्दि-बिदि-अन्धि-बन्धिभ्य:'[9] इति विलक्षणा दृश्यते । तत्र दण्डनाथनारायण वृत्तिः 'बन्धुः' = 'जातिः' इत्यस्ति ॥

माधवीयधातुवृत्तौ "बन्ध बन्धने" इति क्रैयादिके, "बन्धुः 'शॄ-स्वृ-' इति उ प्रत्ययः"[10] इति बन्धुशब्दः व्युत्पादितः । एवम् बन्धुपद-व्युत्पत्ति-ज्ञापनमुखेन प्रभा अस्माकम् उणादिशास्त्रं परिचाययति ॥

**राहु**

सूर्यपूजायां सोमाद्यावरणपूजाप्रसङ्गे 'राहुः' इति उणाद्यन्त-शब्दः प्रभायाम् एवं व्याख्यातः –

**प्रभा** :- (राहुम्) इति । रहयति चन्द्रार्कौ इति राहुः - ।[11]

**विमर्शात्मकम् अध्ययनम्**

सिद्धान्तकौमुद्याम् उणादि-प्रकरणे प्रकृतविषये सूत्रस्वरूपम् एवमस्ति 'दृ-सनि-जनि-चरि-चटिभ्यो ञुण्' [12] (१-३) इति । तत्र 'रहि' इति निर्देशः नास्ति ॥

उणादि-कोषे तु एवमस्ति 'दृ-सनि-जनि-चरि-चटि-रहिभ्यो ञुण्' [13] (१-३) इति । तत्र रहि इति अस्ति । तत्र 'राहुः' इति पदस्य 'रहति = त्यजति, दोषान् इति राहुः' इति वैदिक-लौकिक-कोषे व्युत्पत्तिः प्रादर्शि [14] ॥

परन्तु प्रभायां 'रहयति' इति निर्दिष्टम् । त्यागार्थकः रह-धातुः भ्वादौ अपि अस्ति (रह-त्यागे. सं. ५८३, क्षी.त.) । चुरादौ अपि अस्ति (रह-त्यागे. सं. २४६, क्षी.त.) । अतः रहति, रहयति इत्युभयोः अपि 'त्यजति' इत्येव अर्थः । अमरकोषः-रामाश्रमी, शब्दकल्पद्रुमः, वैदिकलौकिककोषः इत्येतेषु रहति इति, अमरपदविवृतिः, उणादिवृत्तिः इत्यत्र रहयति इति च निर्दिष्टम् ॥

कं त्यजति? इति जिज्ञासायां वैदिकलौकिककोषः 'दोषान्' इति वदति । अमरकोषः-रामाश्रमी, "रहति-गृहीत्वा त्यजति चन्द्रार्कौ - 'रह-त्यागे' भ्वादिः"[15] इति विवृणोति । अमरपदविवृतिः, 'रहयति = त्यजति भुक्त्वा चन्द्रार्कौ' । 'रह त्यागे' इति, 'रहयति रिक्तीकरोति सूर्याचन्द्रमसौ राहुः' इति च स्पष्टयति [16] । शब्दकल्पद्रुमोऽपि 'रहति गृहीत्वा त्यजति चन्द्रम्'[17] इति प्रतिपादयति । श्वेतवनवासि-विरचित-उणादिवृत्तौ 'रह्यते, रहयति इति वा राहुः' [18] इति किञ्चित् अर्थवैशिष्ट्यं सूचितम् । प्रक्रिया-सर्वस्वे 'अधोऽङ्गं त्यजति राहुः'[19] इत्युक्तम् ॥

एवञ्च शरीरे अधोभागस्य त्यागात् राहुः, स्वयम् अन्यैः त्यज्यते इति कारणात् राहुः, सूर्याचन्द्रमसोः रिक्तीकरणात् राहुः, दोषाणां त्यागात् हेतोः राहुः इति विविधविवृतयः यद्यपि उपलभ्यन्ते, तथापि चन्द्रार्कौ, चन्द्रमेव वा गृहीत्वा, भुक्त्वा, त्यजति इति अर्थः सुप्रसिद्धः ॥

अतः राहुग्रहः चन्द्रार्कौ ग्रहणानन्तरं त्यजति इति हेतोः प्रभायां 'चन्द्रार्कौ' इति कर्मनिर्देशः उचितः भाति । 'चन्द्रार्क-त्यागात्, ग्रहविशेषस्य राहुः इति संज्ञा' इति प्रभाव्याख्यानम् अर्थविशेषं स्थापयत्येव ॥

**वह्निः**

वह्नि-शब्दस्य प्रकृति-प्रत्ययविवेचनम् एवं दृश्यते -

**प्रभा :-** (वह्निम्) वहति = प्रापयति हव्यम् इति वह्निः । तम् ।[20]

**विमर्शात्मकम् अध्ययनम्**

सिद्धान्तकौमुद्याम् उणादिप्रकरणे 'वहि-श्रि-श्रु-यु द्रु-ग्ला-हा-त्वरिभ्यो नित्'[21] (सू. - ४९१) इति सूत्रेण 'वह्नि'-शब्दस्य निष्पत्तिः प्रदर्शिता । तत्र 'वह-प्रापणे' इति धातोः

---

[3] स.क्रि.द्यो., पु.सं.-392.

[4] उ.को., पु.सं.-11.

[5] T.U.S.-I, पु.सं.-8.

[6] T.U.S.-II, पु.सं.-4.

[7] श.क.-III, पु.सं.-395.

[8] वा.पत.-VI, पु.सं.-4559.

[9] T.U.S.-VI, पु.सं.-2.

[10] मा.धा.वृ., पु.सं.-529.

[11] स.क्रि.द्यो., पु.सं.-49.

[12] वै.सि.कौ.-IV, सू.-3, पु.सं.-140.

[13] उ.को., सू.-1.3, पु.सं.-8.

[14] उ.को., पु.सं.-8.

[15] अ.को.रा., श्लो.सं.-26, पु.सं.-50.

[16] अ.को.-I, पु.सं.-67, श्लो.सं.-26.

[17] श.क.-IV, पु.सं.-160.

[18] T.U.S.-I, पु.सं.-4.

[19] T.U.S.-II, पु.सं.-2.

[20] स.क्रि.द्यो., पु.सं.-159.

अनेन सूत्रेण निप्रत्ययः विधीयते । स च प्रत्ययः नित् । वह्+नि=वह्नि - इति इष्टरूपसिद्धिः ॥

अमरकोषः-रामाश्रमी[22], औणादिकपदार्णवः[23], उणादिकोषः[24], माधवीयधातुवृत्तिः[25] इत्येतेषु सूत्रानुपूर्वी यथासिद्धान्तकौमुदि वर्तते ॥

परन्तु, दशपाद्युणादिवृत्तिः, 'वहि-श्रि-यु-श्रु-ग्ला-हा-त्वरिभ्यो नित्'[26] इति पठति । 'वहि-श्रि-श्रु-यु-ग्ला-हा-त्वरिभ्यो नित्'[27] इति कुत्रचित् उणादिसूत्रपाठे दृश्यते । कस्मिंश्चित् उणादिसूत्रे तु 'वहि-श्रु-श्रि-यु-क्षुभ्यो नित्'[28] इति पठितम् । दुर्गसिह्मविरचित-उणादिवृत्तौ तु "अगि-श्रु-श्रि-यु-वहिभ्यो निः"[29] इति सूत्रानुपूर्वी विलक्षणा दृश्यते ॥

औणादिकपदार्णवः तु 'सर्वधातुभ्यः इन्', "वह्निर्ना पावके तुण्डिः, वृद्धनाभौ स्त्रियां मता"[30] इति सूत्रान्तरेण वह्निपदं निष्पादयति ॥

एतेषां गहनाध्ययनेन इदं सिद्ध्यति यत् सूत्रानुपूर्वी-भेदे सत्यपि, सर्वैरपि उणादिसूत्रैः वह-धातोः नि-प्रत्ययः एव नित् विधीयत इति। तत्र एकस्मिन् पक्षे इन्-प्रत्ययो विधीयते इति ॥

एवञ्च, वह्निः इति भूयसा नि-प्रत्ययान्तः, अन्यतमपक्षे इन्-प्रत्ययान्तः इति । पक्षद्वयेऽपि 'वहति-प्रापयति हव्यम् इति वह्निः' इति प्रभाविवरणं सङ्गच्छते एव ॥

तत्र अमरकोषः-रामाश्रमी, शब्दकल्पद्रुमः, दशपाद्युणादिवृत्तिः, प्रक्रियासर्वस्वं श्वेतवनवासिवृत्तिः, वैदिक-लौकिक-कोषः, अमरपदविवृतिः इत्येतेषु 'वहति' इति कर्तरि, दशपाद्युणादिवृत्तिः, दुर्गसिह्मविरचितवृत्तिः इत्यनयोः 'उह्यते' इति, कर्मणि च व्युत्पत्तिः प्रदर्शिता । अतः वहनकर्ता, वहनकर्म इति अर्थद्वयलाभः ॥

'वह'-धातोः प्रापणार्थकत्वात् प्रभायां 'प्रापयति' इति यथोचितं विवृतम् । किं प्रापयति? इति कर्माकाङ्क्षोपशमनाय 'हव्यम्' इति प्रयुक्तम् । न तु तस्य कृद्वृत्तौ अन्तर्भावः । अतः वह्निः इत्यत्र प्रभायाः वृत्तिः उणादिसूत्रानुसारम् उचिता एव ॥

## सङ्केतसूची

- **अ.को. -** अमरकोशः
- **अ.को.रा. -** अमरकोषः – रामाश्रमी
- **उ.को. -** उणादिकोषः
- **क्र्या.ग. -** क्र्यादि-गणः
- **क्षी.त. -** क्षीरतरङ्गिणी
- **द.पा.उ. -** दशपाद्युणादिवृत्तिः
- **नि.नि. -** The Nighantu and The Nirukta
- **पु.सं. -** पुटसङ्ख्या
- **मा.धा.वृ. -** माधवीयधातुवृत्तिः
- **वा.पत्. -** वाचस्पत्यम्
- **वै.सि.कौ. -** वैयाकरणसिद्धान्तकौमुदी
- **व्या.म.भा. -** व्याकरणमहाभाष्यम्
- **श.क. -** शब्दकल्पद्रुमः
- **श्लो.सं. -** श्लोकसङ्ख्या
- **स.क्रि.द्यो. -** सप्रभा क्रियाक्रमद्योतिका
- **सं. -** संख्या
- **सू. -** सूत्रम्
- **T.U.S. -** The Unadi Sutras in Various Recentions

## पुस्तकसूची


1. अमरकोशः (दाक्षिणात्यव्याख्योपेतः - I-III), Prof. A.A.Ramanathan, The Adyar Library and Research Centre, 1989.
2. अमरकोषः - सप्रकाश-रामाश्रमी-व्याख्योपेतः, Haragovinda Sastri, Chaukhambha Sanskrit Sansthan, Varanasi, (reprinted) 2008.
3. उणादिकोषः, युधिष्ठिरो मीमांसकः, श्रीमती सावित्रीदेवीबागडिया ट्रस्ट्, कलकत्ता, द्वितीयं संस्करणम् 1987.
4. क्षीरतरङ्गिणी, युधिष्ठिर मीमांसकः, रामलाल कपूर ट्रस्ट प्रेस, बहालगढ, संवत् - 2042.
5. दशपाद्युणादिवृत्तिः, युधिष्ठिर मीमांसकः, The Princess of Wales Sarasvati Bhavana Texts Series - no. 81, 1943.
6. माधवीयाधातुवृत्तिः, स्वामी द्वारिकादासशास्त्री, तारा बुक एजेंसी, वाराणसी, तृतीय संस्करण - 2000.
7. वाचस्पत्यम्, श्रीतारानाथ-तर्कवाचस्पति-भाट्टाचार्यः, चौखम्बा संस्कृत सीरीज आफिस, वाराणसी, 1962.
8. वैयाकरणसिद्धान्तकौमुदी, श्री.पं. गिरिधरशर्मा चतुर्वेदः, श्री.पं.परमेश्वरानन्दशर्मा विद्याभास्करः, मोतीलाल बनारसीदास, दिल्ली, 1986.
9. व्याकरणमहाभाष्यम्, मोतीलाल बनारसीदास, दिल्ली, प्रथम संस्करण - 1967.
10. शब्दकल्पद्रुमः, श्री वरदाप्रसाद-वसुः, श्री हरिचरण-वसुः, चौखम्बा संस्कृत सीरीस आफिस्, वाराणसी, 1961.
11. सप्रभा क्रियाक्रमद्योतिका, (ग्रन्थलिपिमयी) श्रीमत्-अघोरशिवाचार्यः, व्याख्याता-श्रीमत्-निर्मलमणिदेशिकः, रामशास्त्री, अम्बलवनावलज्ञानसम्बन्ध पराशक्ति स्वामिनः, 1927.
12. The Nighantu and the Nirukta, Lakshman Sarup, Motilal Banarsidass Publishers Private Limited, Delhi, (reprinted) 2002.
13. The Unadi Sutras in Various Recensions, I-VI Vol, T.R Chintamani M.A, Navarang, New Delhi, (reprinted) 1992.


---

[21] वै.सि.कौ.-IV, पु.सं.-256.

[22] अ.को.रा., पु.सं.-28.

[23] T.U.S.-IV, पु.सं.-177.

[24] उ.को., पु.सं.-124.

[25] मा.धा.वृ., पु.सं.-299.

[26] द.पा.उ., पु.सं.-12.

[27] T.U.S.-II, पु.सं.-93 & T.U.S.-I, पु.सं.-150.

[28] T.U.S.-VI, पु.सं.-25.

[29] T.U.S.-VI, (दुर्गसिह्मविरचित-उणादिवृत्तिः) पु.सं.-37.

[30] T.U.S.-IV, पु.सं.-192.